31

o/c

**S-III/6/2228B/21**

**षष्ठसत्रार्द्धम्**

**षष्ठपत्रम्**

**नव्यन्यायः**

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**(पक्षतागादाधरी)**

अ. **अतिलघूत्तरीयाः सर्वे प्रश्नाः समाधेयाः।** (15×2=30)

1. तल्लिङ्गकत्वाप्रकारकत्वे सति किञ्चिल्लिङ्गकत्वप्रकारकत्वं किम्?
2. अव्यवहितोत्तरत्वस्य लक्षणं किम्?
3. प्राचीनाः व्यापकतायाः संसर्गतया भानं स्वीकुर्वन्ति न वा?
4. किञ्चिल्लिङ्गकत्वं किम्?
5. लिङ्गभेदेन पक्षत्वं भिन्नं भवति न वा?
6. तृतीयक्षणसाधारणं किम्?

**अथवा**

इतरभेदत्वाद्यवच्छिन्नमुख्यविशेष्यकज्ञानत्वस्य इतरभेदत्वादिप्रकारकज्ञानस्य प्रतिबन्धकतावच्छेदकत्वे को दोषः?

7. पृथिवी इतरभिन्ना इत्यत्र पक्षः कः?

**अथवा**

कुत्र व्यतिरेकिपरामर्शात् साध्यविशेष्यिका तद्विशेषणिका चानुमितिरापद्येत?

8. साध्यविशेषणिकैवानुमितिः कुत्र जायते?

**अथवा**

यत्राधेयत्वं साध्यतावच्छेदकसम्बन्धः तत्र विधेयत्वं किम्?

9. मणिकारः कः?
10. तदन्यमात्रलिङ्गकत्वमित्यस्य कोऽर्थः?
11. सिषाधयिषाविरहवैशिष्ट्यं केन सम्बन्धेन?
12. कामिनीजिज्ञासायाः प्रतिबन्धकत्वं कथम्?
13. तल्लिङ्गकानुमितीच्छा इत्युक्तौ कोऽर्थः?

14. सिषाधयिषाविरहः इत्यत्र स्वप्रतियोगितावच्छेदक सम्बन्धः कः?

**अथवा**

सिद्ध्यभावीयप्रतियोगितावच्छेदकसम्बन्धः कः?

15. विधेयता नाम का?

**अथवा**

पक्षतावच्छेदकावच्छेदेन अनुमितौ व्यापकत्वस्य संसर्गतया भानं के स्वीकुर्वन्ति?

**ब. लघूत्तरीयाः सर्वे प्रश्नाः समाधेयाः।** (5×6=30)

16. तदन्यमात्रलिङ्गकसिद्धीच्छायाः अनुमितिप्रतिबन्धकत्वं वर्णयत।

17. तल्लिङ्गकत्वाप्रकारकत्वं परिष्कुरुत।

18. अनुमितिसिद्ध्योः प्रतिवध्यप्रतिवन्धकभावं विचारयत।

**अथवा**

साध्यविशेष्यकानुमितौ साध्यप्रसिद्धेः विरोधित्वं वर्णयत।

19. साधकमानपदस्य सिद्धिकारणपरत्वे दोषमुद्भाव्य वार्यताम्।

**अथवा**

यदि च पर्वतत्वसामानाधिकरण्येनैव साध्यसिद्धावपि विनाप्यनुमित्सामन्यत्र तादृशानुमितिरानुभविकी तदा धर्मिविशेषोऽपि निवेश्य इति दीधितिग्रन्थं विचारयत।

20. प्राचीनानां मते व्यापकतायाः संसर्गतया भानमस्ति न वेति विचारयत।

**अथवा**

सोदाहरणपूर्वकं लिङ्गभेदन्यायः प्रदर्शनीयः।

**स. दीर्घोत्तरीयः प्रश्नः समाधेयः।** (1×20=20)

21. लिङ्गविशेषणापि नियन्त्रितपक्षत्वमिति ग्रन्थं वर्णयत।

**अथवा**

सोदाहरणं तादृशसिद्ध्यभावजन्यतावच्छेदकसम्वन्धत्वं विस्तरेण प्रतिपादयत।

**अथवा**

पक्षतावच्छेदाकावच्छेदेन अनुमितौ व्यापकत्वभानमावश्यकमिति नव्यमताभिप्रायं वर्णयत।